International Journal of Sanskrit Research 2017; 3(3): 382-385

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(3): 382-385
© 2017 IJSR
www.anantaajournal.com
Received: 02-03-2017
Accepted: 03-04-2017

**सुमित्रा**
शोधच्छात्रा साहित्यविभागः
वेदव्यासपरिसरः, हिमाचलप्रदेश

**Correspondence**
**सुमित्रा**
शोधच्छात्रा साहित्यविभागः
वेदव्यासपरिसरः, हिमाचलप्रदेश

# अष्टाध्याय्याः षष्ठाध्यायगतविशिष्टोदाहरणानां प्रयोगविमर्शः

**सुमित्रा**

**प्रस्तावना**

विदितचरमेवात्र भवतां विद्वन्मूर्धन्यानां विदुषां यत् संस्कृतं हि नाम दैवी वाक्। सेयं देवैर्विद्वद्भिः व्यवह्रियमाणत्वाद्देवभाषेत्युच्यते। 'विद्वांसो वै देवाः' इत्युक्तेः। संस्करणैः संस्कृतत्वाच्च सैव संस्कृतमित्युच्यते। उक्तञ्च–

'संस्कृतं हि दैवी वागन्वाख्याता महर्षिभिः'। इति।
'भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती'। इति।।

सेयमन्वर्थसंज्ञा गीर्वाणवाण्या यत्संस्कृतभाषा देवभाषा वा नामेति। भाषणाद्धि भाषा भवति। भाष्यते भाषणादिव्यवहारोऽनुष्ठीयते यया सा भाषा इति तद्व्युत्पत्तेः। भाषा हि लोकव्यवहारनिर्वहणसाधनेषु प्रधानभावं जुषत इति न तिरोहितं मतिमताम्। भाषाधीनो हि खलु सर्वोऽपि व्यवहारो लोकस्य। तदिदं भाषापरनामधेयं शब्दाह्वयं ज्योतिः सावित्रं ज्योतिरिव लोकयात्रायामस्माकं कियद्वा नोपकरोतीति तु वक्तव्यं नापेक्षते। भाषाया अभावे न कथमपि सिध्येदस्याभिजातजनसमाजस्य लोकव्यवहारप्रपञ्चः। स्थान एवोक्तं खलु महाकविना दण्डिना महाभागेन–

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।[1]

अखिलेऽपि भूमण्डले नास्ति तादृशः कश्चिदपि भूखण्डो यत्र जनसमाजे नापेक्ष्यते भगवत्या भाषाया अनुग्रहः। भाषालोकं विना कृत्स्नोऽपि लोकोऽन्धकारमयः सम्पद्येतेति प्रस्फुटम्। तस्माद् भाषा अपरिहार्या लोकव्यवहारनिष्पत्यर्थमित्यत्र तु प्रमत्तं विना कोऽन्यः संशयीत।
सा च पुनर्भाषा शब्दसंघातजन्या। शब्दानां साधुत्वस्य अन्वाख्यानाय शब्दानुशासनं नाम शास्त्रं प्रवृत्तम्–

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।
अविच्छेदने शिष्टानामिदं स्मृतिनिबन्धनम्।।[2]

यजुर्वेदे 'दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः'[3] इति मन्त्रेण सत्यासत्यविवेचनमपि व्याकरणशब्देन समर्थ्यते। व्याकरणाद् ऋते शुद्धशब्दज्ञानं परिष्कृतशब्दप्रयोगश्च न संभाव्यते। अतएव एकस्यापि शुद्धस्य शब्दस्य ज्ञानं सुप्रयोगश्च स्वर्गे लोके कामधुक्त्वेन प्रशस्यते पतञ्जलिना–

एक शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति।[4]

व्याक्रियन्ते विविच्यन्ते प्रकृतिप्रत्ययादयो यत्र तद् व्याकरणम् इति व्युत्पत्तिम् आश्रित्य व्याकरणं शब्दशास्त्रं नाम। एवं प्रकृतिप्रत्ययविभागकल्पनया सामान्यविशेषवता लक्षणेन च व्याकृतस्य पदस्य अर्थज्ञानं ततश्च तस्य साधुप्रयोग इति व्याकरणस्य मुख्यं फलम्। तथा चोक्तं महाभाष्ये-

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः।।[5]

भाषायां शब्दप्रयोगं दृष्ट्वैव तत्साधुत्वानुशासनं क्रियते इत्याचार्याणां शैली। तथापि मुनित्रयस्य कालादनन्तरं यथा यथा संस्कृतभाषाया व्यवहारो विरलतां गतः तथा तथा शब्दसिद्धिप्रक्रियायामविच्छिन्नायां सत्यामपि सूत्रैः व्याकृतानां बहूनामुदाहरणपदानामर्थः प्रयोगश्च सन्दिग्धतामस्पष्टतां वा गतः। यतो हि तदा वैयाकरणानां पठनपाठनपरम्परायां पदसिद्धिकरणमेव प्रधानं जातम्, उदाहृतपदस्य अर्थज्ञानं वाक्ये प्रयोगश्च गौणतामभजत्। व्याकृतस्य पदस्यार्थज्ञानाभावे वाक्ये तत्प्रयोगोऽसम्भव एवास्ति। एवं च सति व्याकरणस्य प्रयोजनवत्तैव न निष्पद्यते। यथा -

यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।[6]

'तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्' इति। यतः व्याकरणस्योद्देश्यमेव सिद्धानां साधुशब्दानां व्यवहारे प्रयोगः स्यात्। महाभाष्ये सूत्राणामुदाहरणानामवबोधने एव व्याकरणस्य पूर्णता दर्शिता। यथा चोक्तं पतञ्जलिना-

लक्ष्यलक्षणे व्याकरणम्, लक्ष्यं च लक्षणं चैतत् समुदितं व्याकरणं भवति।[7]

अनने ज्ञायते यत् प्रक्रियानुसारेण शब्दनिष्पत्तौ सत्यामपि यावत् उदाहरणानामर्थाः नावबुध्यन्ते तेषां प्रयोगश्च नावगम्यते तावत् अपूर्णमिदं व्याकरणाध्ययनं तत् फलमपि न कदाचिदवाप्यते। अस्माद्धेतोः शोधप्रपत्रेऽस्मिन् उदाहरणार्थस्पष्टीकरणाय षष्ठाध्यायगतसूत्राणां केषाञ्चिदुदाहरणानां प्रयोगविमर्शः प्रस्तूयते। यथा -

''उष्ट्रः सादिवाम्योः'' इत्यस्मिन् सूत्रे उष्ट्रशब्दः पूर्वपदं सादिवाम्योरुत्तरपदयोः प्रकृतिस्वरं भवति। उष्ट्रसादिः, उष्ट्रवामी-इत्युदराहरणे भवतः। उष्ट्रसादिरित्यत्र षष्ठीसमासे मते उष्ट्रस्य सादिः- उष्ट्रसादिरित्यर्थो भवति। सादिशब्दोऽयम् इञन्तो दृश्यते णिन्यन्तश्च-सादिः-सादी-इति। इह सूत्रे द्वयोरपि ग्रहणम् इति व्याख्यातुं शक्यते विशेषनिर्देशाभावात्। एतस्मादेव उदाहरणम् अपि उभयथा लभ्यते-क्वचिद् उष्ट्रसादिः- इति इञन्तः, क्वचिच्च उष्ट्रसादी इति णिन्यन्तः[8]। उभयरूपोऽप्ययं शब्दः प्रायेण तुरङ्गमातङ्गरथारोहेषु दृश्यते[9]। इह उष्ट्रसम्बन्धाद् उष्ट्रारोह इत्यर्थो व्यज्यते। उष्ट्रस्य सादिः सादी वेति। सीदत्यवश्यम् अश्वादिकम् इति सादी[10]। एवम् इञन्तोऽपि सीदतीति सादिः[11]। अथवा सादयति गमयति अश्वादिकम् इति सादी, सदेर्ण्यन्ताण्णिनिः। एवं सादिरिति इञन्तोऽप्यन्तर्भावितण्यर्थ एतदर्थकः स्यात्। अथैवं व्युत्पत्त्या अनयोर्द्वयोरप्यर्थः सारथिरित्यपि भवति। अत एव यादवप्रकाशाचार्यः 'साद्यश्वारोहसूतयोः'[12] इत्याह। हेमचन्द्रमेदिनीकराभ्यामपि[13] 'सादी' इत्यस्य रथारोहः द्धसारथिःत्र्‌ इत्यर्थोऽपि निर्दिष्टः। इञन्तश्च सादिरिति उणादिव्याख्यायां महादेववेदान्तिना सारथिपर्यायः प्रोक्तः। भट्टोजिदीक्षितेन स्वामिदयानन्देन[14] चाप्येतदेव प्रतिपादितम् अयमेव च सादिरिति इञन्तः शब्दो दशपाद्युणादिवृत्तौ अश्वारोहे निर्दिष्टः[15]। इत्थमेतत् सर्वं व्याख्यानं दृष्ट्वा सादिः सादी इत्यनयोरश्वादेरारोहः सारथिश्चेत्यर्थो मन्तुं शक्यते। इह पुनरुष्ट्रसम्बन्धाद् उष्ट्रारोह इत्यर्थो गम्यते। यदि च लोके उष्ट्ररथो दृश्यते तर्हि प्रकतोदाहरणस्य उष्ट्रसारथिरित्यर्थस्वीकरणेऽपि नहि कापि विप्रतिपत्तिरस्ति।

षष्ठीसमासे मतेऽयमर्थो लभ्यते। वृत्तौ त्विह- ''कर्मधारयो·यं षष्ठीसमासो वा'' इत्युक्तम्- कर्मधारयपक्षे कथमुदाहरणार्थसङ्गति भविष्यतीति वृत्तिकार एव वेत्तु। न्यासकृता पदमञ्जरीकर्त्रा च वृत्तिकारस्यैतत् कथनमधिकृत्य न काचिदिट्पप्णी कृता। स्वरसिद्धान्तचन्द्रिकाकारः श्रीनिवासयज्वमहाभागस्तु एतत्कथनं टीकयन्नाह- ''कर्मधारयः षष्ठीतत्पुरुषो वेति वृत्तिः। आद्ये द्धकर्मधारयेत्र्‌ अश्वारोहे अश्वायां च प्रसिद्धयोः सादिवामीशब्दयोरुष्ट्रे गौणी वृत्तिरित्याहुः[16] इति। अथैवं मते सति उष्ट्रश्चासौ सादी च-इति कथमर्थसङ्गतिरिति न किञ्चित् स्फुटीकृतं यज्वमहाभागेन।

वासुदेवशरण-अग्रवालमहोदयेन प्रकृतोदाहरणस्य उष्ट्रस्य उष्ट्या वा आरोहः द्धसवारत्र्‌ इत्येवार्थो निर्दिष्टः[17]। श्रीराधारमणपाण्डेयेन त्विदमुदाहरणम् ''उष्ट्राणां वधस्य कारयिता'' इत्येवमर्थापितम्[18]। सदेर्विशरणार्थं पुरस्कृत्यायमर्थः कृत इति प्रतीयते।

उष्ट्रवामी इत्यपरमुदाहरणमत्र। वामीशब्दो ङ्यन्तः स्त्रियां वर्त्तमानोऽश्वायां प्रसिद्धः। अमरकोशेऽयमश्वापर्यायत्वेन पठितः[19]। वैजयन्तीकोषकारोऽप्येनमज्वापर्यायेषु परिगणयति[20]। हेमचन्द्राचार्यश्चास्य शब्दस्य शृगाली, करभी, रासभी, इत्यन्यानपि अर्थान् सङ्गृहणाति[21]। मेदिनीकोषकारोऽपि हेमचन्द्रनिर्दिष्टान् अर्थान् परिगणयति[22]। अथेह वामीशब्दस्य सर्वेष्वप्येतेष्वर्थेषु सत्सु षष्ठीतत्पुरुषसमासे- उष्ट्रस्य वामी इति न काचिद् अर्थसङ्गतिर्भवति। कर्मधारये चापि उष्ट्रश्चासौ वामी च इति नहि कश्चिदर्थ उपपद्यते। इह 'कर्मधारयोऽयं ष्टाष्ठीसमासो वा' इति वृत्तावुक्तम्। तत्र कर्मधारये कथमुदाहरणार्थसङ्गतिरिति विशदयितुकामः स्वरसिद्धान्तचन्द्रिकाकारः श्रीनिवासयज्वा प्राह- ''आद्ये द्धकर्मधारये मतेत्र्‌ अश्वारोहे अश्वायां च प्रसिद्धयोः सादिवामीशब्दयोरुष्ट्रे गौणी वृत्तिरित्याहुः इति। अथैवं मते सत्यपि कथमुदाहरणार्थो भवतीति न किञ्चित् स्फुटीकृतं यज्वमहाभागेन।

वासुदेवशरण-अग्रवालमहोदयेन त्वस्योदाहरणस्य उष्ट्राणां वामीनाम् = अश्वतराणां च समुदितो गण इत्यर्थः प्रतिपादितः, स गणः सेनाङ्गभूतः सेनायां शीघ्रप्रयाणार्थमुपयुज्यते स्म इति सम्भावितम्[23]। अत्रेदमवधेयं यद् वामीशब्दस्य अग्रवालनिर्दिष्टोऽयमर्थः कोशग्रन्थेषु नोपलभ्यते। द्वन्द्वसमासमाश्रित्य च उदाहरणार्थस्तेनात्र प्रतिपादितः। वृत्तिकारेण त्विह द्वन्द्वसमासो न मतः, यत्स आह- ''कर्मधारयोऽयं षष्ठीसमासो वा'' इति। मङ्खकोशे वामीशब्दस्य 'अश्वा' इत्यर्थेन सह गन्त्री इत्यपरोऽप्यर्थो निर्दिष्टः[24]। अस्मिन्नर्थे सति उष्ट्रस्य वामी द्धगन्त्रीत्र्‌ उष्ट्रवामी इति

षष्ठीसमासे सम्यगर्थसङ्गतिर्भवति। अस्योदाहरणस्यायमेवार्थः प्रतीयते। कालिदासेन रघुवंशे उष्ट्रवामी शब्दः प्रयुज्यते-

अथोष्ट्रवामी शतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः।
स्पृशन् करेणानतपूर्वकायं सम्प्रस्थितो वाचमुवाच कौत्सः।।[25]

मल्लिनाथेन त्विह- 'उष्ट्राणां क्रमेलकानां वामीनां वडवानां च शतैर्वाहितार्थं प्रापितधनम्' इत्यर्थो व्याख्यातः। भट्टक्षीरस्वामिनाऽप्यस्य प्रयोगस्यायमेवार्थो मतः[26]। परम् इह विपुलतरदक्षिणार्थप्रापणप्रसङ्गे उष्ट्रवामीनाम् = उष्ट्रगन्त्रीणां शतैरित्याद्यर्थः तदपेक्षया विशेषेण प्रसङ्गानुकूलः प्रतीयते। एवं च व्याख्यानेनार्थगौरवमप्यत्र सम्पद्यते। एतेनेयं सम्भावनापि व्यज्यते यत्काव्यकारेणामुमेवार्थमुद्दिश्यायं शब्दोऽत्र प्रयुक्तः स्यादिति।

श्रीराधारमणपाण्डेयेन 'उष्ट्रवामी' इत्यस्य उष्ट्राणां वामयिता वमनकारयिता इत्यर्थो मतः। अयुक्तः खल्वयमर्थः।

''आज्ञायिनि च'' इति सूत्रे मनसाज्ञायी इत्युदाहरणम्। एतत्स्पष्टयन् वृत्तिकार आह- 'मनसाऽज्ञातुं शीलमस्य मनसाज्ञायी'[27]। इह ताच्छील्ये णिनिर्वर्त्तते। मनसा आसमन्ताद् ज्ञातुं शीलं यस्य स मनसाज्ञायी इति गम्यते। भाषावृत्तिकार इह 'मनसाज्ञायिनो योगिनः[28]' इति वाक्यमुदाहरणत्वेनोपस्थापयति। द्व्याश्रयकाव्ये मनसाज्ञायी इति विदुषो विशेषणत्वेन प्रयुज्यते इति तट्टीकायां स्पष्टम्[29]।

''अमूर्धमस्तकात् स्वाङ्गादकामे'' इह कण्ठेकालः उरसिलोमा, उदरेमणिः इति वृत्तिगतान्युदाहरणानि। अथैषामर्थो विमृश्यते- ''कण्ठे कालो॰स्य कण्ठेकालः'' इति वृत्तिकारसम्मतं विग्रहवाक्यम्[30]। कालशब्देनेह कालकूटो विषविशेषो॰भिप्रेत इति प्रतीयते। ''पदेषु पदैकदेशाः प्रयुज्यन्ते'' इति नियमेनैतद् बोध्यम्। एवं सति कण्ठे विद्यते कालः कालकूटाख्यो गरो यस्य स कण्ठेकालः। अथवा यस्य कण्ठे साक्षात् कालः कालरूपो गरलः स कण्ठेकालः। शङ्करश्च तथाभूतत्वाद् अनेनाभिधानेनाभिधीयते। यथाह हेमचन्द्रः-

'कण्ठेकालः शङ्करो नीलकण्ठः' इति।[31]

भोजराजप्रणीते ञृङ्गारप्रकाशे तु 'कण्ठे स्थिताः काला अस्य'[32] इति विग्रहवाक्यं दृश्यते। तत्र कालशब्दः कृष्णसर्पपर्यायोऽस्तीति गम्यते। दृश्यते चास्मिन्नर्थे॰स्य शब्दस्य प्रयोगः। यथा हि बाणभट्टः कादम्बर्यां द्वशुकनासोपदेशेऋ प्रयुङ्क्ते -

'कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते' इति।[33]

एवमिहापि कण्ठे स्थिताः कालाः कृष्णसर्पा अस्येति कण्ठेकालः स एव महादेवः। चान्द्रवृत्तावपि शृङ्गारप्रकाशवाक्यसदृशमेव विग्रहवाक्यं लभ्यते[34]। वासुदेवविजये द्व्याश्रयकाव्ये च शङ्करपर्यायत्वेन कण्ठेकाल इति प्रयोगो दृश्यते। वासुदेवविजये तावत्-

कः कालनेमेरितरो हि कण्ठेकालाङ्घ्रिभागी निपुणः सीमित्याम्।[35]

द्व्याश्रयमहाकाव्ये-

नृपं प्रणम्योरसिलोमकण्ठेकालोपमं मूर्धशिखो न्यषीदत्।[36]

उरसि लोमानि यस्य स उरसिलोमा इत्युच्यते। शृङ्गारप्रकाशेऽयमेवार्थः सङ्केत्यते। उपर्युद्धृते द्व्याश्रयकाव्यस्य पद्ये चेदं प्रयुक्तं दृश्यते। अर्जुनरावणीये एतत्सदृश एव उरसिबाण इति प्रयोगो दृश्यते-

'प्रसह्य राजा ततचारुचापश्शत्रुं चकारोरसिबाणमाशु' इति।[37]

भाषावृत्तावयं प्रयोगः प्रकृतसूत्रस्योदाहरणत्वेनोद्धृतो लभ्यते।[38]
उदरे मणयो यस्य स उदरेमणिरित्यर्थोऽत्र गम्यते। समुद्रस्य कृतेऽयं शब्दं प्रयुक्तः स्यादिति प्रतीयते। प्रमाणं त्वत्र मृग्यम्। अर्जुनरावणीये इदं समुद्रस्य विशेषणत्वेन प्रयुज्यते-

तिमिरप्रतानविनिरुद्धदिङ्मुखं गगनं परिस्फुरिततारकाशतम्।
विलसद्भुजङ्गतनुमेचकं बभावुदरेमणिं जलनिधिं व्यडम्बयत्।।[39]

''हिमकाषिहतिषु च'' इति सूत्रे काशिकावृत्तौ पद्धिमम्, पत्काषि, पद्धतिः इत्युदाहरणानि भवन्ति। पादस्य पादयोर्वा हिमं ञीतं पद्धिममित्यर्थः। पादयोरनुभूयमानं ञीतं पद्धिमम् इति भावः। पदमञ्जरीकारेण प्रकृतोदाहरणस्यायमेवार्थो निर्दिश्यते[40]। गमने खलु पादयोर्भूतलसंसर्गात् विशेषेण शीतमनुभूयते इति तदर्थम् पद्धिमम् इति प्रयुज्यते स्मेति गम्यते। द्व्याश्रयकाव्ये चास्मिन्नेवार्थेऽस्य प्रयोगो लभ्यते- 'पद्धिमार्ता इव विप्रवेषाः'[41] इति। पादयोर्हिममवश्यायः पद्धिमम्, तेन ऋताः पीडिता यथा......। इतीयमत्र अभयतिलकगणिव्याख्या।

पादौ कषतीति पत्काषी पादचारी इत्यर्थः ताच्छील्यकोऽत्र णिनिः। महाभाष्य उद्धृते श्लोके खल्वस्य शोभनः प्रयोगो दृश्यते-

नाकमिष्टसुखं यान्ति सुयुक्तैर्वडवारथैः।
अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः।।[42]

काशिकायामपीदं पद्यमुद्धृतं दृश्यते। इह 'हिमकाषिहतिषु च' इति प्रकृतसूत्रव्याख्याने च वृत्तिकृता- 'अथ पत्काषिणो यान्ति' इत्येव पद्यांश उदाहरणत्वेनोपस्थापितः। प्रकृतोदाहरणस्य भट्टिकाव्ये रावणार्जुनीये चापि प्रयोगो लभ्यते। भट्टिकाव्ये तावत्-

मानुषो नाम पत्काषी राजानं पुरुषाशिनाम्।
योधयिष्यति सङ्ग्रामे दिव्यास्त्ररथदुर्जयम्।।[43]
प्रास्थापयत्.......... पत्काषिणस्तीर्थजलार्थमाशु।[44]

अर्जुनरावणीये च-

पत्काषिणः सादिगणा हताश्वाः पदातिभिस्तत्र समं विचेरुः। इति।[45]

पादाभ्यां हन्यत इति पद्धतिः। सूत्रनिर्दिष्टेन क्तिन्नन्तेन हतिशब्देन सह तृतीयातत्पुरुषसमासः[46]। गमनागमनप्रसङ्गेन पादाभ्यां हन्यत इति पद्धतिर्मार्ग उच्यते[47]। प्रसिद्धश्चायं शब्दोऽस्मिन्नर्थे, प्रचुरप्रयोगविषयश्चास्ति।

एवमेव षष्ठाध्यायगतोदाहरणानां काव्यनाटकादिभ्यः साहित्यिकग्रन्थेभ्यः प्रयोगा अन्विष्याविष्य प्रस्तोष्यन्ते। बहुत्र तूदाहरणार्थः प्रयोगान् अवलम्ब्यैव स्पष्टीकरिष्यते, येनोदाहृतपदानामर्थज्ञानं सारल्येनाधिगतं भविष्यति।

**सन्दर्भग्रन्था**


1. काव्यादर्शः-प्रथमः परिच्छेदः, 34
2. वाक्यपदीयम्- ब्रह्मकाण्डम्, 132
3. यजुर्वेदः- 19.77
4. महाभाष्यम्- पस्पशाह्निकम्
5. महाभाष्यम्- प्रथमभागः, पृ.-2 पूना
6. महाभाष्यम्- प्रथमभागः पृ.2, पूना
7. महाभाष्यम्- पस्पशाह्निकम्
8. काशिका- 6.2.40
9. अमरकोशः- 2.8.60
10. अष्टाध्यायी- 3.3.170
11. उणादिकोषः- 4.1.126
12. वैजयन्तीकोषः- 6.1.65, पृ.- 163
13. मेदिनीकोषः- 20.52, पृ.-94
14. उणादिकोषः (स्वामिदयानन्दकृतः) 4.126
15. दशपाद्युणादिवृत्तिः- 1.53, पृ.-33, 34
16. स्वरसिद्धान्तचन्द्रिका- सूत्रसंख्या-203, पृ.-222
17. पाणिनिकालीन भारतवर्ष-7.4, पृ.-409
18. अर्थप्रकाशिका (समासस्वरप्रकरणम्)- पृ.-221
19. अमरकोशः (रामाश्रमीटीकोपेतः)- 28.46, पृ.-367
20. वैजयन्तीकोषः- 3.7.107, पृ.-81
21. अनेकार्थसंग्रहः- 2.3.41, पृ.-29
22. मेदिनीकोषः- 25.30, पृ.- 110
23. पाणिनिकालीन भारतवर्ष- 4.3, पृ.-210
24. मङ्खकोशः श्लोकः-580, पृ.-79
25. रघुवंशम्- 5.32
26. अमरकोशः (अमरकोशोद्घाटनव्याख्योपेतः)- 2.8.47, पृ.-129
27. काशिका- 6.3.5
28. भाषावृत्तिः- 6.3.5
29. द्व्याश्रयमहाकाव्यम् (सटीकम्) प्रथमः भागः- 6.11, पृ.-451
30. काशिका- 6.3.12
31. अभिधानचिन्तमणिकोशः- 2.109
32. शृङ्गारप्रकाशः- प्रथमः प्रकाशः पृ.-32, द्वितीय प्रकाशः पृ.-63
33. शुकनासोपदेशः पृ.- 58
34. चान्द्रवृत्तिः 2.2.46
35. वासुदेवविजयम्- 3.31
36. द्व्याश्रय. (प्रथमः भागः)- 6.15
37. अर्जुनरावणीयम्- 19.5
38. भाषावृत्तिः- 6.3.12
39. अर्जुन.- 5.33
40. पदमञ्जरी- 6.3.54
41. द्व्याश्रय. (प्रथमः भागः)- 6.76
42. महाभाष्यम्- 3.1.48
43. भट्टिकाव्यम्- 16.28
44. भट्टिकाव्यम्- 3.4
45. अर्जुनरावणीयम्- 19.26
46. अष्टाध्यायी- 2.1.31
47. अमरकोशः- 2.1.15